### १०. काव्यशास्त्रविनोदः ।

१. विपरीताश्चेद् - विपरीताः + चेत् ।
२. विपरीतोऽपि - विपरीतः + अपि ।
३. बिभ्रन्न - बिभ्रत् + न ।
४. ममाज्ञया - मम + आज्ञया ।
५. पितुराज्ञा - पितुः + आज्ञा ।
६. तस्यदिर्न - तस्य + आदिः + न ।
७. तस्यान्तः - तस्य + अन्तः ।
८. तवाप्यस्ति - तव + अपि + अस्ति ।
९. ममाप्यास्ति - मम + अपि + अस्ति ।
१०. गङ्गायाश्चञ्चलतरे - गङ्गायाः + चञ्चलतरे ।

### ११. मनोराज्यस्य फलम् ।

१. शास्त्रविमुखाश्च - शास्त्रविमुखाः + च ।
२. य इदम् - यः + इदम् ।
३. पराभवमाप्नोति - पराभवम् + आप्नोति ।
४. शक्रादपि - शक्रात् + अपि ।
५. स्वभावकृपणो नाम - स्वभावकृपणः + नाम ।
६. तस्याधस्तात् - तस्य + अधस्तात् ।
७. यत्परिपूर्णोऽयम् - यत् + परिपूर्णः + अयम् ।
८. घटस्तावत् - घटः + तावत् ।
९. ततस्तेन - ततः + तेन ।
१०. ततोऽजाभिः - ततः + अजाभिः ।
११. विक्रयणात्प्रभूतम् - विक्रयणात् + प्रभूतम् ।
१२. तस्याहम् - तस्य + अहम् ।
१३. सोमशर्मेति - सोमशर्मा + इति ।
१४. ततोऽहम् - ततः + अहम् ।
१५. चिन्तामसम्भाव्याम् - चिन्ताम् + असम्भाव्याम् ।
१६. साऽपि - सा + अपि ।

---

### घटकपरीक्षा प्रारूपम्

अङ्काः १०

प्र. १. अ) १) चित्रं दृष्ट्वा नामानि लिखत (३ तः २) १

२) सङ्ख्याः अक्षरैः/अङ्कैः लिखत (३ तः २) १

आ) गद्यांशं पठित्वा कृतीः कुरुत। ४

१) एकवाक्येन उत्तरत। (१)

२) सत्यम् असत्यं वा/उचितं कारणं/ कः कं वदति ? (१)

३) गद्यांशात् समानार्थकं/विरुद्धार्थकं शब्दं चिनुत। (१)

४) द्वे त्वान्त/ल्यबन्त/तुमन्त-अव्ययपदे/विभक्त्यन्तपदे चिनुत। (१)

प्र. २. पद्यांशं पठित्वा कृतीः कुरुत। २

१. पद्यांशः-१ कस्यापि एकस्य श्लोकस्य अनुवादं माध्यमभाषया लिखत।(२ तः १) (२)

प्र. ३. व्याकरणम्। २

पृथक्कुरुत। (६ तः ४) (नाम-सर्वनाम-क्रियापदतालिका) (२)

* * *

**पठत बोधत –**

- चित्, चन युतानि विशेषणानि =

चित्, चन एतद् प्रत्ययद्वयम् अनिश्चिततां दर्शयति। 'किम्' इत्यनेन सह तयोः उपयोगः भवति।

(कः + चित्) कश्चित् नृपः, (किम् + चन) किञ्चन नगरम्।

(केन + चित्) केनचित् मुनिना। (कस्य + चित्) कस्यचित् मनुजस्य।

अस्ति **कश्चित्** नृपः। सः **कस्मिंश्चित्** नगरे अटति स्म। **केनचित्** मुनिना सः आहूतः। मुनिः अपृच्छत्, "किम् अन्विष्यसि महाराज?" नृपः **कश्चित्** कालं विचिन्त्य अवदत्, "न किमपि। मम कङ्कणं हस्तात् परिभ्रष्टम्। तद् एव अन्विष्यामि।" ऋषिः उक्तवान्, "हे राजन्, भवान् तु नृपः। अन्यत् किमपि कङ्कणं धारयितुं शक्नोषि। तथापि कङ्कणविषये किमर्थम् एतावत् चिन्तनम्? प्रत्युत भवतः राज्ये कियन्तः जनाः बुभुक्षिताः, **केचन** दरिद्राः, **केचित्** रोगपीडिताः च । **काश्चन** महिलाः उद्योगेन विना निराधाराः। **कैश्चिद्** बालकैः शिक्षणं त्यक्तम्। **केषाञ्चन** शिशूनाम् अन्नादिविषये महती दुरवस्था। **केषुचन** विभागेषु जलव्यवस्था न समीचीना। एतेषां कृते **किमपि** कुरु। कङ्कणविषये चिन्तां मा कुरु। राज्यस्य व्यवस्था नृपस्य परं कर्तव्यम्।"

**यदि -- तर्हि क्रीडा –** (गणकार्यं करणीयम्। )

एकेन गणेन 'यदि' उपयुज्य एकैकं वाक्यं लेखनीयम्। अन्येन गणेन 'तर्हि' इति पदं योजयित्वा एकैकं वाक्यं लेखनीयम्। 'यदि' चिटिकाः पृथक् स्थापयितव्याः। 'तर्हि' चिटिकाः पृथक् स्थापयितव्याः। शिक्षकेण काऽपि एका 'यदि' चिटिका पठितव्या। अनन्तरं 'तर्हि' चिटिका पठितव्या। यद् वाक्यं तस्मात् प्राप्यते तद् अर्थपूर्णं भवेत् वा न इति न द्रष्टव्यं केवलं हसितव्यम्।

यथा – यदि अहं भिषग्वरा भविष्यामि तर्हि पशवः नर्तिष्यन्ति।

☺ ☺ ☺